अथ श्रीमहालक्ष्मीपूजापद्धतिः प्रारभ्यते ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीगणेशाय नमः । अथ भाषाभावार्थ । प्रथम आचमन और प्राणायाम करके अंजली बांधकर श्रीगणेशजीको प्रणाम

श्रीगणेशाय नमः । अथ महालक्ष्मीपूजनम् । तत्रादौ आचम्य प्राणानायम्य । कृतांजलिपुटः श्रीगणेशं प्रणमेत् । ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे गमने तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥ ६ ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥ ७ ॥ इति गणपतिं प्रणम्य संकल्पं कुर्यात् । तत्र तावदक्षिणहस्ते गंधपुष्पाक्षतदूर्वाजलान्यादाय । ॐ वि-

करे । " सुमुखश्चैकदंतश्च " इत्यादि ७ श्लोकोंको पढ़के प्रतिज्ञा संकल्प उच्चारण करे अर्थात् पूजा करनेवाला अपने

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीगणेशाय नमः । अथ भाषाभावार्थ । प्रथम आचमन और प्राणायाम करके अंजली बांधकर श्रीगणेशजीको प्रणाम

श्रीगणेशाय नमः । अथ महालक्ष्मीपूजनम् । तत्रादौ आचम्य प्राणानायम्य । कृतांजलिपुटः श्रीगणेशं प्रणमेत् । ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे गमने तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥ ६ ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥ ७ ॥ इति गणपतिं प्रणम्य संकल्पं कुर्यात् । तत्र तावद्दक्षिणहस्ते गंधपुष्पाक्षतदूर्वाजलान्यादाय । ॐ वि-

करे । " सुमुखश्चैकदंतश्च " इत्यादि ७ श्लोकोंको पढके प्रतिज्ञा संकल्प उच्चारण करे अर्थात् पूजा करनेवाला अपने

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दक्षिण (दहिने) हाथमें चंदन, पुष्प, चावल, दूर्वा तथा जल लेके ऊपरका लिखा हुआ ' ॐ विष्णुः ' आदि संकल्प पढे और आज मैं इस पुण्य तिथिके रोज स्थिर लक्ष्मीजीके प्रसन्नताके अर्थ, संपूर्ण अरिष्ट दुःख निवृत्त होनेके और

ष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे बौद्धावतारे अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे जंबूद्वीपे भरतखंडे भारते वर्षे आर्यावर्तांतर्गतामुकदेशे श्रीगंगायमुनयोरमुकतीरे नर्मदाया अमुकदिग्भागे अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु सत्सु एवंगुणविशिष्टायां शुभपुण्यतिथौ । अमुकगोत्रोऽमुकशर्माहं स्थिरलक्ष्मीप्राप्त्यर्थं श्रीमहालक्ष्मीप्रीत्यर्थं सर्वारिष्टनिवृत्तिपूर्वकं सर्वाभीष्टफलप्राप्त्यर्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं व्यापारे लाभार्थं च गणपतिनवग्रहकलशपूजनपूर्वकं श्रीमहालक्ष्मी-

॥ १ ॥

सर्व मनोरथ आयु, आरोग्य ऐश्वर्य आदि वृद्धिके अर्थ गणेशनवग्रहकलशपूजासहित महालक्ष्मी, महासरस्वती, महा-

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

काली, मषीपात्र (दवात), लेखनी तथा कुबेर आदि देवोंकी पूजा करता हूं ऐसे संकल्प करे । फिर ' गणानां त्वा ' इस मंत्रसे गणेशपूजा करे । जैसे कि आसन, पाद्य, अर्घ्य, आचमन, स्नान, वस्त्र, यज्ञोपवीत, चंदन, केशर, रोली,

महासरस्वतीमहाकालीलेखनीमषीपात्रकुबेरादीनां पूजनं करिष्ये । इति संकल्प्य गणपत्यादि-
पूजनं कुर्यात् ॥ तत्रादौ हस्ते पुष्पाण्यादाय । ॐ गणानां त्वा गणपतिं ठं हवामहे प्रियाणान्त्वा
प्रियपतिं ठं हवामहे निधीनान्त्वा निधिपतिं ठं हवामहे वसो मम आहमजानि गर्भधमात्वमजा-
सि गर्भधम् ॥१॥ ॐ भूर्भुवः स्वः श्रीगणपतिमावाहयामि स्थापयामि ॐ श्रीगणपते इहागच्छ
इह तिष्ठ इत्यावाह्य ॐ मनोजूतिरिति प्रतिष्ठाप्य । ॐ गणपतये नमः आसनं समर्पयामि । पाद्यं
स० । अर्घ्यं स० । आचमनं स० । स्नानं स० । पंचामृतस्नानं स० । पुनः शुद्धोदकस्नानं स० ।
वस्त्रं स० । यज्ञोपवीतं स० । आचमनं स० । गंधं स० । कुंकुमं स० । रक्तचंदनं स० । अक्ष-
तान् स० । पुष्पाणि स० । बिल्वपत्राणि स० । दूर्वांकुरान् स० । धूपं स० । दीपं० । नैवेद्यं

अक्षत, पुष्प, बिल्वपत्र, दूर्वा, धूप, दीप, लड्डू, आचमन, पूगीफल, तांबूल, ऋतुफल, आचमन, दक्षिणा, आरति

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तथा मंत्रपुष्पांजली इत्यादि षोडशोपचारोंकरके श्रीगणपतिको पूजके प्रणाम करे । अथ नवग्रहपूजनम् । अक्षत लेके

स० । (मोदकं स०) । आचमनं स० । पूगीफलं स० । तांबूलं स० । ऋतुफलं स० । आचमनं स० । दक्षिणां स० । आरार्तिकं स० । मंत्रपुष्पांजलिं स० । नमस्कारं समर्पयामि ॥ इति षोडशोपचारैः श्रीगणपतिं संपूज्य । हस्ते जलमादाय । ॐ एतत्कृतं यद्गणपतिपूजनं तेन श्रीमहागणपतिः प्रीयतामित्युत्सृजेत् । इति गणपतिपूजनम् । अथ नवग्रहपूजनम् । पुष्पाक्षतान् गृहीत्वा । ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतं मर्त्यंच । हिरण्ययेनसवितारथेना देवोयाति भुवनानिपश्यन् । ॐ भूर्भुवःस्वः श्रीसूर्य इहागच्छ इह तिष्ठ इति स्थापयेत् १ । ॐ इमंदेवाऽअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेज्यानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोऽस्माकंब्राह्मणानाꣳ राजा ॥ ॐ भूर्भुवःस्वः चंद्र इहागच्छ इह तिष्ठ इति स्थापयेत् २ । ॐ अग्निर्मूर्द्धादिवः ककुत्पतिःपृथिव्याऽअयम् ।

पू०

॥ २ ॥

' आकृष्णेन ' इस मंत्रसे सूर्यका आवाहन स्थापन करे १ । ' इमंदेवा ' इस मंत्रकरके चंद्रमाका आवाहन स्थापन करे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

प्रथम परीक्षार्थ-रघुवंशके द्वितीयादि चार सर्ग सटीक.

विदित हो कि गवर्नमेंट संस्कृत कालेज बनारसकी प्रथम परीक्षामें उपस्थित होनेवाले विद्यार्थियोंके उपकारके लिये हमने मुरादाबादके अनुवादकलाप्रवीण पं. व्रजरत्न भट्टाचार्यसे परीक्षामें नियत हुए रघुवंशके द्वितीयादि चार सर्गोंका परीक्षाकी शैलापर सरल संस्कृतमें व्याख्यान कराके सुवाच्य अक्षरोंमें मुद्रित किया है. परीक्षाके प्रश्नपत्रोंके उत्तर जिस प्रकार लिखे जाते हैं उसी प्रकार यह व्याख्या बनाई गई है. आवश्यकतानुसार कोशके प्रमाण और व्याकरणके द्वारा शब्दसिद्धिभी दीगई है, समुचित स्थानोंमें टिप्पणीयेंभी दीगई है, जिससे ग्रन्थ सभीके लिये उपादेय हो गया है. हम साहसके साथ विश्वास दिलाते हैं इसके अनुसार अभ्यास करनेवाले विद्यार्थी अवश्यही परीक्षामें उत्तीर्ण होंगे मूल्य ८ आना.

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण-मुंबई.

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तथा मंत्रपुष्पांजली इत्यादि षोडशोपचारोंकरके श्रीगणपतिको पूजके प्रणाम करे । अथ नवग्रहपूजनम् । अक्षत लेके

स० । (मोदकं स०) । आचमनं स० । पूगीफलं स० । तांबूलं स० । ऋतुफलं स० । आचमनं स० । दक्षिणां स० । आरार्तिकं स० । मंत्रपुष्पांजलिं स० । नमस्कारं समर्पयामि ॥ इति षोडशोपचारैः श्रीगणपतिं संपूज्य । हस्ते जलमादाय । ॐ एतत्कृतं यद्गणपतिपूजनं तेन श्रीमहागणपतिः प्रीयतामित्युत्सृजेत् । इति गणपतिपूजनम् । अथ नवग्रहपूजनम् । पुष्पाक्षतान् गृहीत्वा । ॐ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतं मर्त्यंच । हिरण्ययेनसवितारथेना देवोयाति भुवनानिपश्यन् । ॐ भूर्भुवःस्वः श्रीसूर्य इहागच्छ इह तिष्ठ इति स्थापयेत् १ । ॐ इमंदेवाऽअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेज्यानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोऽस्माकंब्राह्मणानाꣳ राजा ॥ ॐ भूर्भुवःस्वः चंद्र इहागच्छ इह तिष्ठ इति स्थापयेत् २ । ॐ अग्निर्मूर्द्धादिवः ककुत्पतिःपृथिव्याऽअयम् ।

' आकृष्णेन ' इस मंत्रसे सूर्यका आवाहन स्थापन करे १ । ' इमंदेवा ' इस मंत्रकरके चंद्रमाका आवाहन स्थापन करे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

२। ' अग्निर्मूर्द्धा ' इससे मंगलका ३ ' उद्बुध्ये ' इससे बुधका ४ ' बृहस्पते ' इससे बृहस्पतिका० ५ ' अन्ना-
अपाठ्रिरेताठ्रि सिञ्जिन्वति ॥ ॐ भूर्भुवःस्वः भौम इहागच्छ इह तिष्ठ इति स्थापयेत् । ३ ॐ
उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसठ्रि सृजेथामयंच । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे-
देवायजमानश्चसीदत । ॐ भूर्भुवःस्वः बुध इहा० ४ । ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्वि-
भाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम् ॥ ॐ भूर्भुवःस्वः
गुरो इहा० ५ । ॐ अन्नात्परिस्रुतोरसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमंप्रजापति ऋतेनसत्य-
मिन्द्रियं व्विपानठ्रिशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदंपयोमृतम्मधु ॥ ॐ भूर्भुवः स्वः शुक्र इहा०
६ । ॐ शन्नो देवीरभिष्टयऽ आपोभवन्तुपीतये । शंयोरभिस्रवन्तुनः ॥ ॐ भूर्भुवःस्वः शनै-
श्चर इहा० ७ । ॐ कयानश्चित्रऽआभुव दूतासिदावृधःसखा । कयाशचिष्ठयावृता । ॐ भूर्भुवः
स्वः राहो इहा० ८ । ॐ केतुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ॐ भूर्भुवः
परि ' इस मंत्रसे शुक्रका ६ ' शन्नोदेवी ' इस मंत्रसे शनैश्चरका ७ और ' कयानश्चित्र ' इस मंत्रसे राहुका ८ तथा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

'केतुंकृण्व' इस मंत्रकरके केतुका आवाहन और स्थापन करे ९ । इस प्रकार आवाहन स्थापन करके 'सूर्यादिग्रहेभ्यो नमः' इस नाममंत्रकरके पाद्य अर्घ्य आदि षोडश उपचारोंसे पूजा करे इति । अथ कलशस्थापनम् । प्रथम

स्वः केतो इहागच्छ इह तिष्ठ इति स्थापयेत् ९ । एवमावाहनं स्थापनं च कृत्वा ॐ सूर्यादिग्रहेभ्यो नमः । इति नाममंत्रेण षोडशोपचारैः संपूजयेत् । इति नवग्रहपूजनम् । अथ कलशस्थापनम् । तत्रादौ भूरसिभूमिरसीति भूमिं स्पृष्ट्वा । ॐ भूरसि भूमिरस्यदितिरसिविश्वधाया विश्वस्य भुवनस्यधर्त्री । पृथिवीन्यच्छपृथिवींदृꣳह पृथिवीम्माहिꣳसीः ॥ १ ॥ धान्यमसीतियवान्क्षिप्त्वा । ॐ धान्यमसिधिनुहिदेवान् प्राणायत्वोदानायत्वा व्यानायत्वा दीर्घामनुप्रसितिमायुषेधांदेवोवः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिना चक्षुषेत्वमहीनांपयोऽसि ॥ २ ॥ आजिघ्रेति कलशं स्थापयेत् । ॐ आजिघ्र कलशम्मह्यात्वाविशन्त्विन्दवः । पुनरूर्जा निवर्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वती पुनर्म्मा विशताद्रयिः ॥ ३ ॥ व्वरुणस्यो-

'भूरसिभूमि' इस मंत्रसे भूमिका स्पर्श करके १ 'धान्यमसि' इस मंत्रकरके यव (चावल) आदि धान्य गेरे २ अनं-

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तर उस धान्यके ऊपर ' आजिघ्रकलशं ' इस मंत्रकरके कलश स्थापन कर देवे ३ फिर ' वरुणस्योत्तं ' इस मंत्रसे कलशमें जल भरे ४ ' गंधद्वारा ' इससे चंदन ५ और ' याओषधीः ' इससे सर्वौषधी कलशमें डाले ६ ' कांडात्कां-

त्तंभनमिति जलं पूरयेत् । ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कंभसर्ज्जनीस्थो व्वरुणस्यऽ-ऋतसदन्यसिव्वरुणस्यऽऋतसदनमसि । व्वरुणस्यऽऋतसदनमासीद ॥ ४ ॥ ॐ गंधद्वारां दुराधर्षामिति गंधं प्रक्षिपेत् ॥ ५ ॥ या ओषधीरिति सर्वौषधीः । ॐ याऽओषधीः पूर्व्वाजाता-देवेभ्यस्त्रियुगम्पुरा । मनैनन्नभ्रुणामहठ्ं शतन्धामानिसप्तच ॥ ६ ॥ काण्डात्काण्डादिति दूर्वाः । ॐ काण्डात्काण्डात्प्ररोहन्ती० ॥ ७ ॥ अश्वत्थेव इति पंचपल्लवान् । ॐ अश्वत्थेवो निषदन-म्पर्णेवोव्वसतिष्कृता । गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ८ ॥ स्योना पृथिवीति सप्त मृदः । ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनी । यच्छानः शर्म्मसप्रथाः ॥ ९ ॥ ॐ याः फलिनीर्याऽअफला० इति पूगीफलम् ॥ १० ॥ परिवाजपतिरिति पंचरत्नानि । ॐ परिवाज-

डात् ' इस मंत्र करके दूर्वा ७ और ' अश्वत्थेवो ' इससे पीपल, वड, पलाश, आम, गूलरके पत्ते कलशमें डाले ८

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

'स्योनापृथिवि' इस मंत्रसे सप्तमृत्तिका डाले ९ 'याः फलिनीः' इससे पूगीफल डाले १० 'परिवाजपति' इससे पंचरत्न ११ 'हिरण्यगर्भ' इस मंत्रसे सुवर्ण १२ 'वसोः पवित्र' इससे वस्त्र या सूत वेष्टन करे १३ फिर 'पूर्णा-

पतिः कविरग्निर्हव्याऽयक्रमीत् । दधद्रत्नानिदाशुषे ॥ ११ ॥ ॐ हिरण्यगर्भः समः इति हिर-ण्यम् ॥ १२ ॥ व्वसोः पवित्रमसीति रक्तवस्त्रेण वेष्टयेत् । ॐ व्वसोः पवित्रमसिशतधारं व्वसोः पवित्रमसिसहस्रधारम् । देवस्त्वा सवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्व्वाकामधुक्षः॥ १३॥ पूर्णादर्वीति पूर्णपात्रमुपरि न्यसेत् । ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवविक्रीणावहा-ऽइषमूर्ज्जं शतक्रतो ॥ १४ ॥ ॐ श्रीश्चतेलक्ष्मीश्च इति नारिकेलं स्थापयेत् ॥ १५ ॥ ततः ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्तेयजमानो हविर्भिः ॥ अहेडमानोव्वरुणेहबोध्यु-रुशꣳसमानऽआयुः प्रमोषीः । ॐ वरुणं सांगं सपरिवारं आवाहयामि । इत्यावाह्य । ॐ मनोजूतिर्ज्जुषतामिति प्रतिष्ठाप्य । ॐ अपांपतिवरुणाय नमः इति मंत्रेण षोडशोपचारैः संपू-

दर्वी' इससे पूर्ण पात्र रखके 'श्रीश्चते' इस मंत्रसे नारियल कलशके ऊपर स्थापन करे १४ और 'तत्त्वायामि'

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इस मंत्रकरके वरुणका आह्वाहन करे फिर गंध पुष्प आदि षोडशोपचारसे पूजके ' सर्वेसमुद्राः ' इस मंत्रसे गंगादि
जयेत् । ततो गंगाद्यावाहनं । सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु मम
शांत्यर्थं दुरितक्षयकारकाः ॥ १ ॥ ततः कलशाभिमंत्रणम् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः
समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त
सप्तद्वीपा वसुंधरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ २ ॥ अंगैश्च सहिताः सर्वे कलशं
तु समाश्रिताः । प्रार्थना । देवदानवसंवादे मथ्यमाने महोदधौ ॥ ३ ॥ उत्पन्नोसि तदा कुंभ
विधृतो विष्णुना स्वयं । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ ४ ॥ त्वयि तिष्ठंति
भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ ५ ॥
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः ॥ ६ ॥
त्वत्प्रसादादिमं यज्ञं कर्तुमिच्छे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ७ ॥ इति
तीर्थोंका आवाहन करे । पश्चात् ' कलशस्य मुखे विष्णुः ' इत्यादि ३ श्लोकोंकरके कलशको अभिमंत्रण अर्थात् स्पर्श

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

'स्योनापृथिवि' इस मंत्रसे सप्तमृत्तिका डाले ९ 'याः फलिनीः' इससे पूगीफल डाले १० 'परिवाजपति' इससे पंचरत्न ११ 'हिरण्यगर्भ' इस मंत्रसे सुवर्ण १२ 'वसोः पवित्र' इससे वस्त्र या सूत वेष्टन करे १३ फिर 'पूर्णा-

पतिः कविरग्निर्हव्याऽयक्रमीत् । दधद्रत्नानिदाशुषे ॥ ११ ॥ ॐ हिरण्यगर्भः समः इति हिरण्यम् ॥ १२ ॥ वसोः पवित्रमसीति रक्तवस्त्रेण वेष्टयेत् । ॐ वसोः पवित्रमसिशतधारं वसोः पवित्रमसिसहस्रधारम् । देवस्त्वा सवितापुनातुवसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः॥ १३॥ पूर्णादर्वीति पूर्णपात्रमुपरि न्यसेत् । ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । वस्नेवविक्रीणावहाऽइषमूर्ज्जं ठ शतक्रतो ॥ १४ ॥ ॐ श्रीश्चतेलक्ष्मीश्च इति नारिकेलं स्थापयेत् ॥ १५ ॥ ततः ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्तेयजमानो हविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशठ समानऽआयुः प्रमोषीः । ॐ वरुणं सांगं सपरिवारं आवाहयामि । इत्यावाह्य । ॐ मनोजूतिर्ज्जुषतामिति प्रतिष्ठाप्य । ॐ अपांपतिवरुणाय नमः इति मंत्रेण षोडशोपचारैः संपू-

दर्वी' इससे पूर्ण पात्र रखके 'श्रीश्चते' इस मंत्रसे नारियल कलशके ऊपर स्थापन करे १४ और 'तत्त्वायामि'

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इस मंत्रकरके वरुणका आह्वाहन करे फिर गंध पुष्प आदि षोडशोपचारसे पूजके ' सर्वेसमुद्राः ' इस मंत्रसे गंगादि
जयेत् । ततो गंगाद्यावाहनं । सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु मम
शांत्यर्थं दुरितक्षयकारकाः ॥ १ ॥ ततः कलशाभिमंत्रणम् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः
समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त
सप्तद्वीपा वसुंधरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ २ ॥ अंगैश्च सहिताः सर्वे कलशं
तु समाश्रिताः । प्रार्थना । देवदानवसंवादे मथ्यमाने महोदधौ ॥ ३ ॥ उत्पन्नोसि तदा कुंभ
विधृतो विष्णुना स्वयं । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ ४ ॥ त्वयि तिष्ठंति
भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ ५ ॥
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः ॥ ६ ॥
त्वत्प्रसादादिमं यज्ञं कर्तुमिच्छे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ७ ॥ इति
तीर्थोंका आवाहन करे । पश्चात् ' कलशस्य मुखे विष्णुः ' इत्यादि ३ श्लोकोंकरके कलशको अभिमंत्रण अर्थात् स्पर्श

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

करे और ' देवदानव संवादे ' इत्यादि श्लोकोंकरके प्रार्थना करे ॥ इति कलश पूजनम् । अनंतर ब्राह्मणोंके रक्षाबंधन, तिलक आदि करके खुद यजमानभी रक्षा बंधावे और तिलक आशीष धारण करे । अथ महालक्ष्मीपूजनम् । प्रथम

कलशपूजनम् ॥ ततो ब्राह्मणपूजनं रक्षाबंधनं च कुर्यात् । अथ महालक्ष्मीपूजनम् तत्रादौ ध्यानम् ॥ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी गंभीरावर्त्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया । या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुंभैः सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ॥ १ ॥ इति ध्यात्वा । ॐ सर्वलोकस्य जननीं शूलहस्तां त्रिलोचनाम् ॥ सर्वदेवमयीमीशां देवीमावाहयाम्यहम् ॥ २ ॥ ॐ महालक्ष्म्यै नमः आवाहनं समर्पयामि इत्यावाहनम् । ॐ तप्तकांचनवर्णाभं मुक्तामणिविराजितम् ॥ अमलं कमलं दिव्य-मासनं प्रतिगृह्यताम् ॥ ३ ॥ इत्यासनम् । (लाजाश्च कुंकुमाश्चैव तंडुलाः पुष्पमेव च । सर्वौ-

तो लक्ष्मीका ' या सा पद्मा ' इस श्लोकको पढके ध्यान करे १ । अनंतर ' सर्वलोकस्य ' इस मंत्रसे आवाहन करे २ और ' तप्तकांचन० ' इस मंत्रको पढके आसन देवे ३ फिर लाजा (खील) कुंकुम, चावल, पुष्प, सर्वौषधी, जल

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इत्यादि सामग्रीसहित पाद्यपात्र लेके ' गंगादितीर्थ ' इस मंत्रसे पाद्यदान करे ४ अनंतर चंदन, अगर, कस्तूरी लाल चंदन, कुंकुम तथा देवदार इत्यादि अष्टगंधसहित अर्घपात्र लेके ' अष्टगंधसमायुक्तं० ' इस मंत्रसे अर्घ देवे ५ ' सर्वलो-

षधिसमायुक्तं पंचांगं पाद्यमुच्यते) ॐ गंगादितीर्थसंभूतं गंधपुष्पाक्षतैर्युतम् । पाद्यं ददाम्यहं देवि गृहाणाशु नमोस्तु ते ॥ ४ ॥ इति पाद्यम् । (चंदनागरुकस्तूरी रक्तचंदनचंद्रिका । कुंकुमं सुरदारुश्च अष्टगंधं प्रकीर्त्तितम्) अष्टगंधसमायुक्तं स्वर्णपात्रप्रपूरितम् । अर्घ्यं गृहाण मद्दत्तं महालक्ष्म्यै नमोस्तु ते ॥ ५ ॥ इत्यर्घम् । ॐ सर्वलोकस्य या शक्तिर्ब्रह्मविष्ण्वादिभिः स्तुता । ददाम्याचमनं तस्यै महाकाल्यै मनोहरम् ॥ ६ ॥ इत्याचमनम् । ॐ पंचामृतसमायुक्तं जाह्न-वीसलिलं शुभम् । गृहाण विश्वजननि स्नानार्थं भक्तवत्सले ॥ ७ ॥ इतिस्नानम् । ॐ दिव्यांबरं नूतनं हि क्षौमं त्वतिमनोहरम् । दीयमानं मया देवि गृहाण जगदंबिके ॥ ८ ॥ इति वस्त्रयुगम् । कापिलं दधिकुंदेदुधवलं मधुसंयुतम् । स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण भोः ॥ ९ ॥ इति

कस्य ' इस मंत्रसे आचमन करावे ६ और ' पंचामृतसमायुक्तं ' इससे पंचामृतका स्नान और शुद्ध जलसे स्नान करावे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

७ फिर ' दिव्यांबरं ' इस मंत्रसे पाटवस्त्र अर्पण करे ८ पश्चात् ' कापिलं ' इस मंत्रसे मधुपर्क देके ९ ' रत्नकंकण ' इससे आभरण (गहिना) अर्पण करे १० और ' श्रीखंडागरु ' इस मंत्रसे चंदन ११ ' रक्त चंदन० ' इससे लाल

मधुपर्कम् । ॐ रत्नकंकणवैदूर्यमुक्ताहारादिकानि च । सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ॥ १० ॥ इत्याभरणानि । श्रीखंडागरुकर्पूरमृगनाभिसमन्वितम् । विलेपनं गृहाणाशु नमोस्तु भक्तवत्सले ॥ ११ ॥ इति चंदनम् । ॐ रक्तचंदनसम्मिश्रं पारिजातसमुद्भवम् । मया दत्तं गृहाणाशु चंदनं गंधसंयुतम् ॥ १२ ॥ इति रक्तचंदनम् । ॐ सिंदूरं रक्तवर्णं च सिंदूरतिलकप्रिये । भक्त्या दत्तं मया देवि सिंदूरं प्रतिगृह्यताम् ॥ १३ ॥ इति सिंदूरम् । ॐ कुंकुमं कामदं दिव्यं कुंकुमं कामरूपिणम् । अखंडकामसौभाग्यं कुंकुमं प्रतिगृह्यताम् ॥ १४ ॥ इति कुंकुमम् । ॐ तैलानि च सुगंधानि द्रव्याणि विविधानि च । मया दत्तानि लेपार्थं गृहाण परमेश्वरि ॥ १५ ॥ इति सुगंधतैलम् । ॐ मंदारपारिजातादीन्पाटलीं केतकीं तथा । मरुत्रामोगरं चैव

चंदन लक्ष्मीजीके अर्पण करे १२ फिर ' सिंदूरं रक्तवर्णं च ' इस मंत्रसे सिंदूर १३ और ' कुंकुमं कामदं ' इस मंत्रसे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

रोली (केशर) अर्पण करे १४ ' तैलानिच ' इस मंत्रसे अतर (सुंगधी तैल) चोढे १५ ' मंदार ' इस मंत्रसे पुष्प अर्पण करे १६ ' विष्ण्वादिसर्वदेवानां ' इस मंत्रसे दूर्वा १७ और ' पद्मशंख ' इस मंत्रकरके पुष्पोंकी माला

गृहाणाशु नमोस्तु ते ॥ १६ ॥ इति पुष्पाणि । ॐ विष्ण्वादिसर्वदेवानां प्रियां सर्वसुशोभनाम् । क्षीरसागरसंभूते दूर्वां स्वीकुरु सर्वदा ॥ १७ ॥ इति दूर्वाः । ॐ पद्मशंखजपापुष्पैः शतपत्रैर्विचित्रिताम् । पुष्पमालां प्रयच्छामि गृहाण त्वं सुरेश्वरि ॥ १८ ॥ इति पुष्पमालाम् । अथाङ्गपूजा । ॐ चपलायै नमः पादौ पूजयामि १ । ॐ चंचलायै नमः जानुनी पूजयामि २ । ॐ कमलायै नमः कटिं पू० ३ । ॐ कात्यायन्यै० नाभिं पू० ४ । ॐ जगन्मात्रे नमः जठरं पू० ५ । ॐ विश्ववल्लभायै नमः वक्षस्स्थलं पू० ६ । ॐ कमलवासिन्यै नमः नेत्रत्रयं पू० ७ । ॐ श्रियै नमः शिरः पूजयामि ८ । इत्यंगपूजा । अथ पूर्वादिक्रमेणाष्टदिक्ष्वष्टसिद्धिः पूजयेत् ।

अर्पण करे १८ ॥ अथ अंगपूजा । ' चपलायै० ' इससे पैरोंकी १ और ' चंचलायै ' इससे गोडोंकी पूजा करे २ ' कमलायै ' इससे कटिभागकी ३ और ' कात्यायन्यै ' इससे नाभिकी पूजा करे ४ ' जगन्मात्रे ' इससे पेटकी ५

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

और 'विश्ववल्लभायै०' इस मंत्रसे छातीकी ६ 'कमलवासिन्यै' इससे नेत्रोंकी पूजा करे ७ फिर 'श्रियैनमः' इस मंत्रसे शिरकी पूजा करे ८ अष्टसिद्धियोंका पूजन कर 'आद्यल०' इत्यादि नामोंसे आठ लक्ष्मियोंको पूजे। अनंतर

ॐ अणिम्ने नमः १। ॐ महिम्ने नमः २। ॐ गरिम्णे नमः ३। ॐ लघिम्ने नमः ४। ॐ प्राप्तये नमः ५। ॐ प्राकाम्याय नमः ६। ॐ ईशितायै नमः ७। ॐ वशितायै नमः ८। अथ पूर्वादिक्रमेणाष्टलक्ष्मीपूजनम्। ॐ आद्यलक्ष्म्यै नमः १। ॐ विद्यालक्ष्म्यै नमः २। ॐ सौभाग्यलक्ष्म्यै नमः ३। ॐ अमृतलक्ष्म्यै नमः ४। ॐ कामलक्ष्म्यै नमः ५। ॐ सत्यलक्ष्म्यै नमः ६। ॐ भोगलक्ष्म्यै नमः ७। ॐ योगलक्ष्म्यै नमः ८। इति। ॐ वनस्पतिरसोत्पन्नो गंधाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ १९ ॥ इति धूपम्। ॐ कर्पूरवर्त्तिसंयुक्तं घृतयुक्तं मनोहरम्। तमोनाशकरं दीपं गृहाण परमेश्वरि ॥ २० ॥ इति दीपम्। ॐ नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम्। षड्रसैरन्वितं दिव्यं लक्ष्मि देवि नमोस्तु ते ॥

'वन०' यह मंत्र पढके धूप देवे १९ 'कर्पूरवर्ति' ३ इससे दीपक चासे २० 'नैवेद्यं' इस मंत्रसे नैवेद्य समर्पण

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

करे २१ ' शीतलं निर्मलं ' इस मंत्रकरके आचमन करावे २२ फिर ' एलालवंग ' इस मंत्रसे तांबूल० २३ ' हिरण्य-

॥ २१ ॥ इति नैवेद्यम् । शीतलं निर्मलं तोयं कर्पूरेण सुवासितम् । आचम्यतां मम जलं प्रसीद त्वं महेश्वरि ॥ २२ ॥ इत्याचमनम् । ॐ एलालवंगकर्पूरनागपत्रादिभिर्युतम् । पूगीफलेन संयुक्तं तांबूलं प्रतिगृह्यताम् ॥ २३ ॥ इति तांबूलम् । ॐ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात्फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥ २४ ॥ इति फलम् । ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ २५ ॥ इति दक्षिणाम् । चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् । आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ॥ २६ ॥ इति नीराजनम् । ॐ यानि यानि च पापानि ब्रह्महत्यासमानि च । तानि तानि विनश्यंति प्रदक्षिणपदे पदे ॥ २७ ॥ इति प्रदक्षिणा । ॐ केतकीजातिकुसुमैर्मल्लिकामालतीभवैः । पुष्पांजलिर्मया दत्तस्तव प्रीत्यै नमोस्तु ते ॥ २८ ॥ इति मंत्रपुष्पांजलिम् । ॐ सुरा-

गर्भ ' इससे दक्षिणा अर्पण करे २४ ' चक्षुर्दं ' इस मंत्रसे नीराजन २५ और ' फलेनफलितं ' इससे ऋतुफले २६

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

'यानिकानि' इससे प्रदक्षिणा करे २७ और 'केतकीजाति' इस मंत्रसे पुष्पांजलि २८ 'सुरासुरेंद्रा' इत्यादि तीन

सुरेंद्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तव पादपंकजम् । परावरं पातु वरं सुमंगलं नमामि भक्त्या तव कामसिद्धये ॥ २९ ॥ भवानी त्वं महालक्ष्मि सर्वकामप्रदायिनी । सुपूजिता प्रसन्ना स्यान्महालक्ष्म्यै नमोस्तु ते ॥ ३० ॥ नमस्ते सर्वदेवानां वरदासि हरिप्रिये । या गतिस्त्वत्प्रपन्नां सा मे भूयात्त्वदर्चनात् ॥ १ ॥ इति प्रार्थना ॥ अथ मषीपात्र (दवात) पूजनम् । तत्रादौ ध्यानम् । सद्यश्छिन्नशिरः कृपाणमभयं हस्तैर्वरं बिभ्रतीं घोरास्यां शिरसा स्रजं सुरुचिरामुन्मुक्तकेशावलिम् । सृक्काऽसृक्प्रवहां श्मशाननिलयां श्रुत्योः शवालंकृतिं श्यामाङ्गीं कृतमेखलां शवकरैर्देवीं भजे कालिकाम् ॥ १ ॥ ॐ महाकाल्यै नमः । मषि त्वं लेखनीयुक्ता चित्रगुप्तशयस्थिता । सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥ २ ॥ या मायाप्रकृतिः शक्तिश्चंडमुंडविमर्दिनी । सा पूज्या सर्वदेवैश्च ह्यस्माकं वरदा भव ॥ ३ ॥ ॐ जातवेदसे सुनवामसोममप

श्लोकोंकरके २९।३०।३१ प्रार्थना करे । अथ मषीपात्र (दवात) पूजनम् ॥ तत्रादौ ध्यानम् । प्रथम 'सद्यच्छिन्न'

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इस मंत्रको पढके ध्यान करे । अनंतर ' मषित्वं ' इत्यादि ३ मंत्रोंसे कालीका आवाहन करे पश्चात् गंधादिकोंसे पूजा
रातीयतो निदहातिवेदः । सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ १ ॥ ॐ महा-
कालि इहागच्छ इह तिष्ठ इत्यावाह्य ॐ महाकाल्यै नमः । इति षोडशोपचारैः पूजयेत् । तत
आवरणपूजा । ॐ काल्यै नमः १ । ॐ कपालिन्यै नमः २ । ॐ फुल्लायै नमः ३ । ॐ कुरु-
कुलायै नमः ४ । ॐ विरोधिन्यै नमः ५ । ॐ विप्रचित्तायै नमः ६ । ॐ उग्रप्रदत्तायै नमः ७।
ॐ दिव्यायै नमः ८ । ॐ नीलायै नमः ९ । ॐ घनायै नमः १० । ॐ बलाकायै नमः ११ ।
ॐ मात्रायै नमः १२ । ॐ मुद्रायै नमः १३ । एतैर्नाममंत्रैर्गंधादिपूजां कृत्वा । या कालिका
रोगहरा सुवंद्या वेश्यानुकूलैर्मदनातुरैश्च । जनैर्जनानां भयहारिणी च सा देवमाता मयि सौख्य-
दात्री ॥ १ ॥ इति मंत्रपुष्पांजलिं समर्पयेत् । अथ लेखनीपूजा । तत्रादौ ध्यानम् । शुक्लां
ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभयदां जाड्यांधकारापहाम् ।
करके ' काल्यै नमः ' इत्यादि १३ नाम मंत्रोंसे आवरण पूजा करे । पूजा करनेके अनंतर ' याकालिका ' इस मंत्रसे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पुष्पांजलि अर्पण करे । अथ लेखनीपूजा ' शुक्लांब्रह्म ' इस श्लोकको पढके श्रीसरस्वतीका ध्यान करे और ' कृष्णा-

हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ १॥ इति ध्यात्वा । कृष्णानने द्विजिह्वे च चित्रगुप्तकरस्थिते । सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥ २ ॥ ॐ प्रणोदेवीसरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टुधियावसुः ॥ ३ ॥ ॐ वीणापुस्तकधारिण्यै नमः । इति मंत्रेण षोडशोपचारैः संपूज्यावरणपूजां कुर्यात् । ॐ वाचित्यै नमः १ । ॐ वाग्वादिन्यै नमः २ । ॐ अजितायै नमः ३ । ॐ विष्णुमायायै नमः ४ । ॐ हिंगुलायैः नमः ५ । ॐ यज्ञविद्यायै नमः ६ । ॐ सिद्धविद्यायै नमः ७ । ॐ प्रज्ञायै नमः ८ । ॐ पद्मावत्यै नमः ९ । ॐ भुवनेश्वर्यै नमः १० । अथ नामपूजा । लेखन्यै नमः । सरस्वत्यै नमः । ब्रह्माण्यै नमः । भारत्यै नमः । गिरे नमः । वाचे नमः । वाण्यै नमः । हंसगमनायै नमः । पद्महस्तायै नमः । शारदायै नमः इति गंधादिपूजां कृत्वा । कृष्णानने कृष्ण-

नने ' इन २ मंत्रोंसे षोडशोपचार पूजा करे पश्चात् वाचि० इत्यादि १० नममंत्रोंकरके आवरण पूजा करे और ' लेख०'

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इत्यादि नामोंसे पूजा करके ' कृष्णानने ' इस मंत्रसे पुष्पांजलि दान करे फिर ' याकुंदेंदु ' इस मंत्रसे प्रार्थना करे ।
अथ द्रव्यनिधिस्थाने कुबेरपूजनम् । ' कुबेराय नमः ' इस नाममंत्रसे कुबेरका आवाहन स्थापन करके षोडशोपचारसे

जिह्वे चित्रगुप्तशयस्थिते । पुष्पांजलिं गृहाण त्वं सदैव वरदा भव ॥ १ ॥ इति पुष्पांजलिं दद्यात् । अथ प्रार्थना । या कुंदेंदुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदंडमंडितकरा या श्वेतपद्मासना । या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वंदिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ १ ॥ तरुणशकलमिंदोर्बिभ्रती शुभ्रकांतिः कुचभरनमितांगी सन्निषण्णा सिताब्जे । निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥ ॥ २ ॥ अथ द्रव्यनिधिस्थाने कुबेरपूजनम् । ॐ कुबेराय नमः कुबेरमावाहयामि स्थापयामि इत्यावाह्य षोडशोपचारैः संपूज्य । ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च । भवन्तु त्वत्प्रसादान्मे धनधान्यादिसंपदः ॥ १ ॥ इति प्रार्थयेत् । अथ तुलापूजनम् । नमस्ते सर्व-

पूजा करे फिर ' धनदाय ' इस मंत्रसे प्रार्थना करे ॥ अथ तुला (ताखडी) पूजा । ' नमस्ते सर्वदेवानां ' इस

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मंत्रसे तुलाका आवाहन स्थापन करके षोडशोपचारसे पूजा करे। अथ दीपपूजनम्। 'भो दीपत्वं' इस मंत्रसे गंध,
देवानां शक्तित्वे सत्यमाश्रिता। साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥ १ ॥ ॐ तुलायै
नमः। तुलामावाहयामि स्थापयामि। इत्यावाह्य। गंधादिभिः संपूजयेत्। अथ दीपपूजनम्।
भो दीप त्वं ब्रह्मरूप अंधकारनिवारक। इमां मया कृतां पूजां गृहंस्तेजः प्रवर्धय ॥ १ ॥ ॐ
दीपाय नमः। इति गंधाक्षतपुष्पैः संपूज्य श्रीमहालक्ष्म्यै निवेदयेत्। ततः। दीपावलिं मया
दत्तां गृहाण त्वं सुरेश्वरि। आरार्तिकप्रदानेन ज्ञानदृष्टिप्रदा भव ॥ १ ॥ अग्निर्ज्योती रविर्ज्यो-
तिश्चन्द्रज्योतिस्तथैव च। उत्तमः सर्वतेजस्सु दीपोयं प्रतिगृह्यताम् ॥ २ ॥ इत्यारार्तिकम्।
प्रदक्षिणां च कृत्वा। ॐ पुष्पांजलिं गृहाण त्वं पादांबुजयुगार्पितम्। मया भक्त्या सुमनसा
प्रसीद परमेश्वरि ॥ ३ ॥ इति पुष्पांजलिं दद्यात्। अथ प्रार्थना। नमस्ते सर्वदेवानां वरदासि
हरिप्रिये। या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ॥ १ ॥ विश्वरूपस्य भार्यासि पद्मे
अक्षत, पुष्प आदिसे दीपककी पूजा करके महालक्ष्मीके निवेदन कर देवे अनंतर 'दीपावली' इत्यादि २ मंत्रोंसे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

जुष्टामुदाराम् । तांपद्मिनीमींशरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वांवृणे ॥ ५ ॥ आदित्य-
वर्णेतपसोधिजातो वनस्पतिस्तव वृक्षोथबिल्वः । तस्य फलानि तपसा नुदंतुमायांतरायाश्च
बाह्याऽअलक्ष्मीः ॥ ६ ॥ उपैतुमांदेवसखः कीर्तिश्चमणिना सह । प्रादुर्भूतोस्मिराष्ट्रेऽस्मिन्
कीर्तिंवृद्धिंददातुमे ॥ ७ ॥ क्षुत्पिपासामलाज्येष्ठां अलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं
च सर्वान्निर्णुद मे गृहात् ॥ ८ ॥ गन्धद्वारांदुराधर्षां नित्यपुष्टांकरीषिणीम् । ईश्वरीं सर्वभूतानां
तामिहोपह्वयेश्रियम् ॥ ९ ॥ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य
मयि श्रीः श्रयतांयशः ॥ १० ॥ कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले
मातरं पद्ममालिनीम् ॥ ११ ॥ आपः सृजन्तुस्निग्धानि चिक्लीत वसमे गृहे । निचदेवींमातरं
श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्करिणीं पुष्टीं पिङ्गलांपद्ममालिनीम् । चंद्रां हिरण्मयीं
लक्ष्मीं जातवेदो मआवह ॥ १३ ॥ आर्द्रां यष्करिणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यांहिर-
ण्मयीं लक्ष्मीं जातवेदोमआवह ॥ १४ ॥ तांमआवह जातवेदो लक्ष्मीमनपगामिनीम् ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयंपुरुषानहम् ॥ १५ ॥ यः शुचिः प्रयतोभूत्वाजुहु-
यादाज्यमन्वहम् । श्रियः पञ्चदशर्चञ्च श्रीकामःसततं जपेत् ॥ १६ ॥ इति श्रीसूक्तं समाप्तम् ॥

अथ श्रीलक्ष्मीजीकी आरती प्रारम्भ ।

जय लक्ष्मीमाता जय लक्ष्मीमाता । तुमकूं निशि दिन सेवत हर विष्णू धाता ॥ टेर ॥ ब्रह्माणी रुद्राणी कमला तुहि है जगमाता । सूर्य चंद्रमा ध्यावत नारद ऋषिगाता ॥ जय० ॥ १ ॥ दुर्गारूप निरंजनि सुखसंपतिदाता । जो कोइ तुमकूं ध्यावत ऋषि सिधि धन पाता ॥ जय ल० ॥ २ ॥ तूही है पातालवसंती तूही है शुभदाता । कर्मप्रभावप्रकाशक जगनिधिसे त्राता ॥ जय ल० ॥ ३ ॥ जिस घर थारो बासो जाहिमें गुण आता । कर न सकै सोइ करले मन नहिं धडकाता ॥ जय ल० ॥ ४ ॥ तुम विन यज्ञ न होवे वस्त्र न होय राता । खान पानको विभवै तुम बिन कुण दाता ॥ जय ल० ॥ ५ ॥ शुभगुणसुंदरयुक्ता क्षीरानिधीजाता । रत्न चतुर्दश तोकूं कोइभी नाहिं पाता ॥ जय ल० ॥ ६ ॥ या आरति लक्ष्मीजीकी जो कोइ नर गाता । उर आनँद अति उमँगै पाप उतर जाता ॥ जय ल० ॥ ७ ॥ स्थिरचर जगत बचावै कर्म प्रेर ल्याता । रामप्रताप भैयाकी शुभ दृष्टी चाता । जय लक्ष्मीमाता जय लक्ष्मीमाता । तुमको निशी दिन सेवत हर बिष्णू धाता ॥ ८ ॥

इति श्रीलक्ष्मीजीकी आरती समाप्त । १।९।१४

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मजगंगाविष्णोः 'लक्ष्मीवेंकटेश्वर' मुद्रणागारे रामचंद्र राघो इत्यनेन अंकयित्वा प्रकाशितम् । सं. १९७१.

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

आरती करके प्रदक्षिणा करे ॥ पश्चत् ' पुष्पांजलि ' इस मंत्रसे पुष्पांजलि देके ' नमस्ते सर्वदेवानां ' इत्यादि ११

पद्मालये शुभे । महालक्ष्मि नमस्तुभ्यं सुखरात्रि कुरुष्व मे ॥ २ ॥ वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् । सुखरात्रिः प्रभातेऽद्य तन्मे लक्ष्मीं व्यपोहतु ॥ ३ ॥ या रात्रिः सर्वभूतानां या च देवेष्ववस्थिता । संवत्सरप्रिया या च सा ममास्तु सुमंगला ॥ ४ ॥ माता त्वं सर्वभूतानां देवानां सृष्टिसंभवा । आख्याता भूतले देवि सुखरात्रि नमोस्तु ते ॥ ५ ॥ दामोदरि नमस्तेस्तु नमस्त्रैलोक्यमातृके । नमस्तेऽस्तु महालक्ष्मि त्राहि मां परमेश्वरि ॥ ६ ॥ शंखचक्रगदाहस्ते शुभ्रवर्णे शुभानने । मम ह्यष्टवरं देहि सर्वसिद्धिप्रदायिनि ॥ ७ ॥ नमस्तेऽस्तु महालक्ष्मि महा-सौख्यप्रदायिनि । सर्वदा देहि मे द्रव्यं दानाय भुक्तिहेतवे ॥ ८ ॥ धनं धान्यं धरां हर्षं कीर्तिं-मायुर्यशः श्रियः । तुरगान्दंतिनः पुत्रान्महालक्ष्मि प्रयच्छ मे ॥ ९ ॥ यन्मया वांछितं देवि तत्सर्वं सफलं कुरु । न बाध्यतां कुकर्माणि संकटान्मे निवारय ॥ १० ॥ न्यूनं वाप्यतुलं वापि यन्मया मोहितं कृतम् । सर्वं तदस्तु संपूर्णं त्वत्प्रसादान्महेश्वरि ॥ ११ ॥ इति प्रार्थना । ततो

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मंत्रोंसे प्रार्थना करे ॥ पश्चात् ब्राह्मणोंको दक्षिणा देके आशीर्वाद लेवे और 'यान्तुदेव' इस मंत्रसे देवोंको विसर्जन करे।

विप्रेभ्यो दक्षिणादानम्। तद्द्वारा आशीर्वाचनं कार्यम्। ॐ श्रीमहालक्ष्मीपूजनविधेर्यन्न्यूनमतिरिक्तं तत्सर्वं ब्रह्मणानां वचनात् श्रीगणपतिप्रसादात् संपूर्णमस्तु। इति पठित्वा। अक्षतानादाय ॐ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ १ ॥ इति देवान् विसृजेत्। इति श्रीमहालक्ष्मीपूजनं समाप्तम्। श्रीगणेशाय नमः। अथ श्रीसूक्तप्रारम्भः। ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मआवह ॥ १ ॥ तां मआवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मादेवीर्जुषताम् ॥ ३ ॥ कांसोस्मितां हिरण्यप्राकारामार्द्रांज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ चन्द्रांप्रभासांयशसा ज्वलन्तींश्रियं लोके देव-

इति श्रीमहालक्ष्मीपूजनं भाषाटीकासहितं समाप्तम्।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इति श्रीमहाऽक्ष्मीपूजापद्धतिः समाप्ता ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi